नत्वम् । यथा, महाभारते । १२ । २२८ । ४ ।
"सामान्यमृषिभिर्गत्वा ब्रह्मलोकनिवासिभिः ।
ब्रह्मेवामितदीप्तौजाः शान्तपाप्मा महातपाः ।
विचचार यथाकामं त्रिषु लोकेषु नारदः ॥")

सामान्यं, त्रि, ( समानस्य भावः । समान+ ष्यञ् । ) अनेकसम्बन्ध्येकवस्तु । साधारणम् । इत्यमरः । ३ । १ । ८२ ॥ यथा, देवलः ।
"सामान्यं पुत्त्रकन्यानां मृतायां स्त्रीधनं विदुः ।
अप्रजायां हरेद्भर्त्ता माता भ्राता पितापि वा ॥"
इति दायतत्त्वम् ॥
( यथा च कुमारे । ७ । ४४ ।
"एकैव मूर्त्तिर्बिभिदे त्रिधा सा
सामान्यमेषां प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचित्
वेधास्तयोस्तावपि धातुराद्यौ ॥" )

सामान्यलक्षणा, स्त्री, (सामान्यं साधारणधर्म्मः लक्षणं यस्याः । ) अलौकिकसन्निकर्षविशेषः । स तु आश्रयव्यापकसामान्यज्ञानम् । यथा । एकघटदर्शने सकलघटज्ञानं भवति ईदृशघटत्वादिज्ञानम् । तत्प्रमाणं यथा, भाषापरिच्छेदे ।
"अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ।
सामान्यलक्षणा ज्ञानलक्षणा योगजस्तथा ॥
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्षते ॥"

सामान्यशासनं, क्ली, ( सामान्यं शासनम् । ) सामान्याधिकारः । यथा,—
"महेन्द्रकोषी स्याद्ब्रह्मशासनं धर्म्मकीलकः ।
सामान्यशासनं सौरं सुकृतिः शूद्रशासनम् ॥"
इति पुरवर्गे शब्दरत्नावली ॥

सामान्या, स्त्री, (सामान्य + टाप् । ) साधारणी नायिका । अस्या लक्षणम् । धनमात्रलाभार्थसकलपुरुषाभिलाषा ॥ सा त्रिधा । अन्यसम्भोगदुःखिता । वक्रोक्तिगर्व्विता । मानवती । वक्रोक्तिगर्व्वितापि द्विविधा । प्रेमगर्व्विता सौन्दर्य्यगर्व्विता च । एता नायिका अवस्थाभेदेन प्रत्येकं अष्टप्रकारा भवन्ति । यथा ! प्रोषितभर्त्तृका १ खण्डिता २ कलहान्तरिता ३ विप्रलब्धा ४ उत्कण्ठिता ५ वासकसज्जा ६ स्वाधीनपतिका ७ अभिसारिका ८ । इति रसमञ्जरी ॥ ( यथा च साहित्यदर्पणे । ३ । १११—११२ ।
"धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका ।
निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि ।
वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः ॥
काममङ्गीकृतमपि परिक्षीणधनं नरम् ।
मात्रा निष्कासयेदेषा पुनः सन्धानकाङ्क्षया ॥
तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा ।
लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः ॥
एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।
रक्तायां वा विरक्तायां रतमस्यां सुदुर्लभम् ॥"
पण्डको वातरोगपण्डादिः । छन्नं प्रच्छन्नं ये कामयन्ते ते छन्नकामाः । तत्र रागहीना यथा नटकमेलकादौ मदनमञ्जर्य्यादिः । रक्ता यथा मृच्छकटिकादौ वसन्तसेनादिः । पुनश्च ।
"अवस्थाभिर्भवन्त्यष्टावेताः षोड़शभेदिताः ॥
स्वाधीनभर्त्तृका तद्वत् खण्डिताथाभिसारिका
कलहान्तरिता विप्रलब्धा प्रोषितभर्त्तृका ।
अन्या वासकसज्जा स्याद्विरहोत्कण्ठिता
तथा ॥"
एतासां लक्षणानि तु तत्तच्छब्दे विशेषतो द्रष्टव्यानि ॥ )

सामि, व्य, अर्द्धम् । निन्दा । इत्यमरः । ३ । ३ । २४८ ॥

सामिकृतः, त्रि, अर्द्धीकृतः । सामिशब्दात् कृधातोः क्तप्रत्ययेन निष्पन्नः ॥

सामिधेनी, स्त्री, (समिधां आधानी । समिध् + "सामिधामाधाने षेण्यण् ।" ४ । ३ । १२० । इत्यस्य वार्त्तिकोक्त्या षेण्यण् । षित्वात् ङीष् ।) अग्निसमिन्धना ऋक् । अग्नेर्ज्वालने या ऋक् पठ्यते । तत्पर्य्यायः । धाय्या २ । इत्यमरः । २ । ७ । २२ ॥ ( यथा, महाभारते । ३ । १३४ । १६ ।
"नवैवोक्ताः सामधेन्यः पितॄणां
तथा प्राहुर्नवयोगं विसर्गम् ॥"
समित् । इति मेदिनी ॥

सामिपीतः, त्रि, अर्द्धपानकृतः । सामिशब्दात् पाधातोः क्तप्रत्ययेन निष्पन्नः ॥

सामिभुक्तः, त्रि, अर्द्धभुक्तः । सामिशब्दात् भुजधातोः क्तप्रत्ययेन निष्पन्नः ॥ ( यथा, रघुः । १९ । १६ ।
"वल्लभाभिरुपसृत्य चक्रिरे
सामिभुक्तविषया समागमाः ॥" )

सामीची, स्त्री, वन्दना । इति हारावली ॥

सामीप्यं, क्ली, (समीपस्य भावः । समीप् + चतुर्वर्णादित्वात् ष्यञ् । ) समीपत्वम् । नैकट्यम् । यथा,—
"वः कसामीप्यसादृश्यसाकल्यानुक्रमर्द्धिषु ॥"
इति मुग्धबोधव्याकरणम् ॥
अधिकरणविशेषः । आधारभेदः । यथा,—
"सामीप्याश्लेषविषयैर्व्याप्त्याधारश्चतुर्व्विधः ।"
इति कारके मुग्धबोधव्याकरणम् ॥

सामुद्रं, क्ली, ( समुद्रे भवम् । अण् । ) समुद्रलवणम् । इति हेमचन्द्रः ॥ करकच् इति भाषा । तत्पर्य्यायः ।
"सामुद्रं यत्तु लवणं त्रिकुटं कड़कच्च तत् ॥"
इति रत्नमाला ॥
अस्य गुणाः ।
"सामुद्रं लवणं पाके नात्युष्णमविदाहि च ।
भेदनं मधुरं स्निग्धं शूलघ्नं नातिपित्तलम् ॥"
इति राजवल्लभः ॥
अन्यत् समुद्रलवणशब्दे द्रष्टव्यम् ॥ * ॥ समुद्रफेनम् । इति राजनिर्घण्टः ॥ ( समुद्रेण ऋषिणा प्रोक्तमिति । अण् । ) देहचिह्नम् । इति मेदिनी ॥ ( तल्लक्षणान्वितग्रन्थविशेषः । इति केचित् ॥ ) समुद्रजाते, त्रि । इति च मेदिनी ॥ ( पुं, समुद्रगामी वणिक् । यथा, याज्ञवल्क्ये । २ । ३८ ।
"कान्तारगास्तु दशकं सामुद्रा विंशकं शतम् ।
दद्युर्व्वा स्वकृतां वृद्धिं सर्व्वे सर्व्वासु जातिषु ॥"
मशकविशेषः । यथा, सुश्रुते । ५ । ८ ।
"मशकाः सामुद्राः परिमण्डलो हस्तिमशकः कृष्णः पार्व्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशः शोफश्च । पार्व्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः ॥" * ॥ देशविशेषः । यथा, मार्कण्डेये । ५८ । १३ ।
"प्राग्ज्योतिषाः सलौहित्याः सामुद्राः पुरुषादकाः ।
* * * *
वर्द्धमानाः कोशलाश्च मुखे कूर्म्मस्य संस्थिताः ॥" )

सामुद्रकं, क्ली, (सामुद्रमेव । स्वार्थे कन् ।) समुद्रलवणम् । इति राजनिर्घण्टः ॥ समुद्रोक्तस्त्रीपुंलक्षणग्रन्थः । तद्विवरणं यथा,—
श्रीकृष्ण उवाच ।
"कीदृशः पुरुषो वन्द्योऽवन्द्यो वा कीदृशो भवेत्
कन्या वा कीदृशी शस्या गर्हिता वापि
कीदृशी ॥
महेश उवाच ।
शृणु कृष्ण प्रवक्ष्यामि समुद्रवचनं यथा ।
लक्षणन्तु मनुष्याणां एकैकेन वदाम्यहम् ॥
वामभागे तु नारीणां दक्षिणे पुरुषस्य च ।
निर्द्दिष्टं लक्षणं तेषां समुद्रेण यथोदितम् ॥
पूर्व्वमायुः परीक्षेत पश्चाल्लक्षणमेव च ।
आयुर्हीनं नराणाञ्चेत् लक्षणैः किं प्रयो-
जनम् ॥"
अथ पुरुषलक्षणम् ।
"पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविशालं प्रशस्यते ॥
बाहुनेत्रद्वयं कुक्षौ द्वौ तु नासा तथैव च ।
स्तनयोरन्तरञ्चैव पञ्चदीर्घं प्रशस्यते ॥
ग्रीवा च कर्णौ पृष्ठञ्च ह्रस्वे जङ्घे सुपूजिते ।
चत्वारि यस्य ह्रस्वानि पूजां प्राप्नोति नित्यशः ॥
सूक्ष्माण्यङ्गुलिपर्व्वाणि दन्तकेशनखत्वचः ।
पञ्च सूक्ष्माणि येषां हि ते नरा दीर्घजीविनः ॥
नासा नेत्रञ्च दन्ताश्च ललाटञ्च शिरस्तथा ।
हृदयञ्चैव विज्ञेयमुन्नतं षट् प्रशस्यते ॥
पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च ।
तालुकोऽधरजिह्वा च सप्तरक्तं प्रशस्यते ॥
स्वरो बुद्धिश्च नाभिश्च त्रिगम्भीरमुदाहृतम् ।
उरः शिरो ललाटञ्च त्रिविस्तीर्णं प्रशस्यते ॥
कटिर्विशाला बहुपुत्त्रभागी
विशालहस्तो नरपुङ्गवः स्यात् ।
उरो विशालं धनधान्यभागी
शिरो विशालं नरपूजितः स्यात् ॥
न श्रीस्त्यजति रक्ताङ्गं नार्थः कनकपिङ्गलम् ।
दीर्घबाहुं न चैश्वर्य्यं न मांसोपचितांसकम् ॥
कदाचिद्दन्तुरो मूर्खः कदाचित् लोमशः सुखी ।